## (625) " ज्ञा अवबोधने "

(IX-क्र्यादिः-1507. सक. अनि. पर. मित् ।) प्वादिः ।

'जानातीति श्नि सिद्ध्येत्, ज्ञपयति तु पुनर्मारणादौ घटादेः

णौ[चौ]मित्त्वेऽपीदमेव ज्ञपनमिति [ज्ञप मिद् इति] पदं ज्ञापने मारणादौ। तेनार्थाज्ज्ञापनेऽर्थे ज्ञपयतिपदवज् ज्ञापयेदित्यपि स्यात्;

उक्तस्योक्तिः, 'णिचश्च' (1-3-74) त्युदितविहतये; ज्ञापयेत्— 'ज्ञा नियोगे' ॥ (श्लो. 8) इति देवः ।

[1]ज्ञायकः-यिका, [2]ज्ञापकः-[3]ज्ञपकः-पिका, [4]जिज्ञपयिषकः-षिका, ज्ञीप्सकः-प्सिका, [5]जिज्ञासकः-सिका, [6]जाज्ञायकः-यिका;

ज्ञाता-त्री, ज्ञापयिता-ज्ञपयिता-त्री, जिज्ञपयिषिता-ज्ञीप्सिता-त्री, जिज्ञासिता-त्री, जाज्ञायिता-त्री;

---

1. 'आतो युक् चिण्कृतोः' (7-3-33) इति ण्वुलि परतो युगागमः। एवं घञि णमुल्यपि ज्ञेयम् ।
2. मारणाद्यर्थस्याप्रतीत्या, अत्र मित्त्वं न; अतः, उपधाह्रस्वो न। एवं सर्वत्र ण्यन्ते मारणाद्यर्थाप्रतीतौ ज्ञेयम् ।
3. घटादौ 'मारणतोषणनिशामनेषु ज्ञा' (ग. सू. भ्वादौ) इति जानातेः मित्संज्ञायाम्, आदन्तलक्षणे पुगागमे उपधाह्रस्वे रूपमेवम् । एवं ण्यन्ते ह्रस्वघटितरूपस्योपपत्तिः सर्वत्र ज्ञेया ।
4. अस्य धातोर्ण्यन्तात् सनि रूपाणि प्रदर्शितानि । तत्र हेतुस्तु—'सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्' (7-2-49) इति सूत्रेण ण्यन्तात् परस्य सन इड्विकल्प एव । इट्पक्षे जिज्ञपयिषकः इति रूपम् । एवं इट्पक्षे सर्वत्र ण्यन्तात् सनि रूपं ज्ञेयम् । इडभावपक्षे, 'आप्ज्ञप्यृधामीत्' (7-4-55) इतीत्वे, 'अत्र लोपोऽभ्यासस्य' (7-4-58) इत्यभ्यासलोपे च रूपम्—ज्ञीप्सकः इत्यादि । एवं ण्यन्तात् सनि इडभावपक्षे रूपं ज्ञेयम् ।
5. द्वित्वे, अभ्यासस्य, 'सन्यतः' (7-4-79) इतीत्वे रूपम् । एवं सन्नन्ते सर्वत्र रूपं ज्ञेयम् ।
6. द्वित्वे, अभ्यासस्य, 'दीर्घोऽकितः' (7-4-83) इति दीर्घः । एवं यङन्ते सर्वत्र ज्ञेयम् ।